| छन्दसां वृत्तिनामानि। | | छन्दसां लक्षणगणाः। | छन्दसामुदाहरणानि। |
|---|---|---|---|
| जघनचपला | | प्राक्प्रतिपादितमर्द्धे प्रथमे प्रथमेतरे च चपलायाः। लक्ष्माश्रयेत सोक्ता विशुद्धधीभिर्जघनचपला॥ | |
| प्रथमे चरणे | १२ | ऽऽऽऽ।।ऽ | लक्ष्मः श्रृङ्गारपटुर्यौवनमदचपलः सुललिताङ्गः। |
| द्वितीये | १८ | ऽ।।।ऽ।ऽ।।ऽऽ | आसीद्व्रजाङ्गनानां मनोहरो जघनचपलानाम्॥ |
| तृतीये | १२ | ऽऽ।ऽ।ऽऽ | |
| चतुर्थे | १५ | ।ऽ।ऽ।।।।ऽऽ | |
| गीतिः | | आर्याप्रथमार्द्धसमं यस्या अपरार्द्धमाह तां गीतिम्। | |
| प्रथमे चरणे | १२ | ऽ।।ऽऽऽऽ | केशववंशीगीतिर्लोकमनोहारिणीहारिणी जयति। |
| द्वितीये | १८ | ऽ।।ऽ।।।ऽ।ऽ।।ऽ | गोपीमानग्रन्थेर्विमोचनी दिव्यगायनाचार्य्या॥ |
| तृतीये | १२ | ऽऽऽऽऽऽ | अत्र द्वितीयचरणान्तलघोर्गुरुत्वम्॥ |
| चतुर्थे | १८ | ।ऽ।ऽऽ।ऽ।ऽऽऽ | |
| उपगीतिः | | आर्यापरार्द्धतुल्ये दलद्वये प्राहुरुपगीतिम्। | |
| प्रथमे चरणे | १२ | ।।ऽ।ऽ।ऽऽ | नवगोपसुन्दरीणां रासोल्लासे मुरारातिम्। |
| द्वितीये | १५ | ऽऽऽऽ।ऽऽऽ | अस्मारयदुपगीतिः स्वर्गकुरङ्गीदृशां गीतिम्॥ |
| तृतीये | १२ | ऽऽ।।।।ऽऽऽ | |
| चतुर्थे | १५ | ऽ।।ऽऽ।ऽऽऽ | |
| उद्गीतिः | | आर्याशकलद्वितये विपरीते पुनरिहोद्गीतिः। | |
| प्रथमे चरणे | १२ | ऽऽ।ऽ।ऽ।। | नारायणस्य सन्ततमुद्गीतिः संस्मृतिर्भक्त्या। |
| द्वितीये | १५ | ऽऽऽऽ।ऽऽऽ | अर्चायामासक्तिर्दुस्तरसंसारसागरे तरणिः॥ |
| तृतीये | १२ | ऽऽऽऽऽऽ | |
| चतुर्थे | १८ | ऽ।।ऽऽ।ऽ।ऽ।।ऽ | |
| आर्यागीतिः | | आर्याप्राग्दलमन्तेऽधिकगुरु तादृगपरार्द्धमार्यागीतिः। | |
| प्रथमे चरणे | १२ | ऽऽऽ।।।।ऽ | हर्षाश्रुस्तिमितदृशः प्रमोदरोमाञ्चकञ्चुकाञ्चितदेहाः। |
| द्वितीये | २० | ।ऽ।ऽऽ।ऽ।ऽ।।ऽऽ | आर्यागीतिं भक्त्या गायन्ति श्रीपतेश्चरितसम्बद्धाम्॥ |
| तृतीये | १२ | ऽऽऽऽऽऽ | लघुगुरुविपर्य्ययरूपप्रस्तारभेदेन बहुविधा आर्य्या भवन्ति॥ |
| चतुर्थे | २० | ऽऽऽऽ।ऽ।।।ऽऽऽ | |
| पूर्व्वार्द्धे विंशत्याश्चतुर्विंशत्या वा मात्राणां परार्द्धे षोड़शमात्राणां परे लघुवर्णचतुष्टये सति प्रथमं द्वितीयं वा लघ्वक्षरं प्राप्य आर्य्यायाः सामान्येन यतिनियमः॥ | | | |
| वैतालीयम्। चपरवक्रमित्येके। | | षड्विषमेऽष्टौ समे कलास्ताश्च समेस्युर्नो निरन्तरा। न समात्र पराश्रिता कला वैतालीयेऽन्ते रलौ गुरुः॥ | |
| प्रथमे चरणे | १४ | ।।ऽ।।ऽ।ऽ।ऽ | सुस्थेन मदेन चर्चितं तव यन्निन्दति राधिके कुचम्। |
| द्वितीये | १६ | ।।ऽऽ।।ऽ।ऽ।ऽ | मुदमातनुतेऽत्र पक्किमं तद्वैतालीयं फलं हरेः॥ |
| तृतीये | १४ | ।।ऽ।।ऽ।ऽ।ऽ | लघुगुरुव्यत्ययेनापि बहुधा भवति॥ |
| चतुर्थे | १६ | ऽऽऽऽऽ।ऽ।ऽ | |
| औपच्छन्दसकम् | | तत्रैवान्तेऽधिके गुरौ स्यादौपच्छन्दसकं कवीन्द्रहृद्यम्। | |
| प्रथमे चरणे | १६ | ऽऽऽऽ।ऽ।ऽऽ | आतन्वानं सुरारिकान्तास्वौपच्छन्दसकं सदा विनोदम्। |
| द्वितीये | १८ | ऽऽऽ।।ऽ।ऽ।ऽऽ | कंसं यो निर्जघान देवो वन्दे तं जगतां स्थितिं दधानम्॥ |
| तृतीये | १६ | ऽऽऽऽ।ऽ।ऽऽ | |
| चतुर्थे | १८ | ऽऽऽ।।ऽ।ऽ।ऽऽ | |
| एतद्वैतालीयभेदः॥ | | | |